नन्दिग्रामः कोसला च त्रयो ग्रामाः प्रकीर्तिताः ॥ ३ ॥

End:

पुरीतन्मथुरा प्रोक्तं यत्र शेते हरिः स्वयम् ।

कृष्णो प्रोक्तं गयाक्षेत्रं लिङ्गनिष्क्रमणं मतम् ॥ २९ ॥

* *

सर्वभूतदया तीर्थं ध्यानतीर्थमनुत्तमम् ।

एतानि पञ्च तीर्थानि सप्तषष्टीनि देहिनाम् ॥ ३३ ॥

वसन्ति येषु देहेषु तेषु स्नानं समाचरेत् ।

Colophon:

इति श्रीवराहपुराणे हिमवत्खण्डे धरणीवराहसंवादे अध्यात्मतीर्थ-
यात्रा समाप्ता ।

Remarks:—The Ms. is in a fairly good condition,

॥ भारद्वाजश्राद्धखण्डव्याख्यानम् ॥

11811. BHĀRADVĀJAŚRĀDDHAKHAṆḌA-VYĀKHYĀNAM.

Burnell's Catalogue No. 9858. Palm leaf. $16\frac{1}{4}\times 1\frac{1}{2}$ inches. Leaves—151 Index 1. Lines—4 to a Page. Telugu. No. of Granthas—2000. Complete. Not printed.

Beginning:

श्रीवेदव्यासाय नमः ॥

श्राद्धकाण्डभारद्वाजिव्याख्यानम् ।

इदानीमानीय तान्यतः पदार्थान्सापिण्डीकरणे नियम-

माह—अथातः सपिण्डीकरणे पित्रादेः मातामहादेश्चौपा-
सने कुर्यात् । इदानीं अग्निमिन्धेति सूत्रभाष्यवाक्यम् । अत्र
याज्ञवल्क्यः ॥

End:

अमावास्यादिनियतं माससंवत्सरादृत इति…तः ॥

निगदव्याख्यानमेतद्विरुक्तद्र……. ॥

Colophon: Nil.

Remarks: The Ms is in a decaying condition. The penultimate sheet contains the following:

नळनामसंवत्सरं माघशुद्धप्रतिपदनाडु भारद्वाजसूत्रव्याख्यानं प्राशिंदि
समाप्तम् ॥ साम्बशिवाय नमः । रामचन्द्राय नमः ।

BHĀRADVĀJAŚRĀDDHAKHAṆḌAVYĀKHYĀNAM.

Descriptive No	Collection No		Substance.	Script.	Remarks
11812	B. L.	9359	Pl.	Gr.	Incomplete.
11813	,,	9360 (a)	,,	,,	,,

॥ अग्निसंधानम् ॥

11814. AGNISANDHĀNAM.

Burnell's Catalogue No. 6539. Paper 10¾ × 4¾ inches. Sheets—6 Lines—8 or 9 to a Page. Devanāgarī. No. of Granthas—260 Complete. Printed.

Beginning:

श्रीगणेशाय नमः ॥

भारद्वाजसूत्रमाग्निसंधानमेकाग्नि त्रादशाहं विच्छिन्नपुनरा-
धेयः । कृच्छ्रादिभिः संशोध्यात्मानं प्राणानायम्य द्वादशाहं

त्विच्छिन्नौपासनाग्निं पुनराधास्ये । अस्मिन्नग्निसंधानकर्मणि ब्रह्माणं त्वां वृणीमहे । ब्राह्मणाभावे कूर्चे ब्रह्माणमावाह-यामि ।

End:

आचार्यं पूजयेदेवं कृते चैवं सर्वान्पितॄन्समाधिगच्छति । ब्रह्मलोके महीयते इत्याह भगवान्बोधायनः ॥ हरिः ॐ ॥ श्रीगुरुभ्यो नमः ।

Colophon: Sheet No. 43.

दशाहतन्त्रं समाप्तम् ।

Remarks:—The Ms. is in good condition.

॥ अनुयागप्रयोगः ॥

11815. ANUYĀGAPRAYOGAH.

Burnell's Catalogue No. 6172. Paper. 4×2½ inches. Sheets—15 Lines—6 to a Page. Devanāgarī. No. of Granthas—60. Śeṣa. Complete. Not printed.

Beginning:

श्रीवेदव्यासाय नमः ॥

श्रीमध्वं रमणं नत्वा तन्त्रसारोक्तमार्गतः ।
प्रयोगमनुयागस्य वक्ष्ये ज्ञानानुसारतः ॥

अथ अनुयागप्रयोगो विधीयते ॥ सम्यगावाहनादि-धूपदीपान्तं तन्त्रसारोक्तप्रकारेण भगवन्तं संपूज्य रङ्ग-वल्ल्याद्यलंकृते श्रीबीजाङ्किते मण्डले सुसंस्कृतं षड्रसाद्यु-पेतमन्नं निधाय विधिवद्धरये समर्प्यानुयागं कुर्यात् ॥ तद्यथा प्राणानायम्य देशकालौ संकीर्त्य ॥

End:

ततः पुनर्धूपदीपान्ते पूजयेदिति संक्षेपः ।

Colophon.

अनुयागप्रयोगोऽयं तन्त्रसारोक्तमार्गतः ।

सतां मनःप्रसादाय निर्मितः शेषशर्मणा ॥

Remarks:—The Ms. is in good condition.

॥ अनुष्ठानपद्धतिः (सव्याख्या) ॥

11816. ANUṢṬĀNAPADDHATIḤ—SVYĀKHYĀ.

Burnell's Catalogue No. 9533 a. Palm leaf. 10¾ × 1½ inches. Leaves—20. Lines—5-7 to a Page. Grantha. No. of Granthas—500. Kṛṣṇānanda. Complete. Not printed.

Beginning:

श्रीगुरुचरणारविन्दाभ्यां नमः ॥

निष्णाता यत्कृपादृष्टिस्तृष्णादिगरनिग्रहे ।

कृष्णानन्दगुरुः सोऽयं पुष्णातु मम मङ्गलम् ॥

End:

[मू] अन्तर्विश्वमिदं यस्मिन्नादर्शे प्रतिबिम्बवत् ।

यज्ज्योती राजताभामं तं वन्दे देवकीसुतम् ॥

[व्या] आदर्शे दर्पणे प्रतिबिम्बवत् मुखादिप्रतिबिम्बमिव०

करणविशेषानुक्तिः । त्रिविधकरणैरपि नमस्कारः सूचितः ॥

Colophon:

गम्भीरभावा गुरुभिः कृतानुष्ठानपद्धतिः ।

व्याख्याता याध्वरीन्द्रेण वीक्ष्यतां मोक्षकाङ्क्षिभिः ॥

हरिः ॐ ॥

नित्यं कर्म यदार्यपादरचितामाशां नमस्कुर्महे
नित्यो मन्त्रजपो यदार्यविषयं नामामनामोऽनिशम् ।
नित्यं ध्यानमिदं यदार्यचरणाम्भोजं स्मरामो वय
नान्यत्कर्म न वा जपं न च परं ध्यानं समीहामहे ॥

हरिः ॐ ॥ श्रीगुरुभ्यो नमः ॥ श्रीरामाय ब्रह्मणे परमात्मने नमः ॥
श्रीरामः शरणम् ॥

Remarks:—The Ms. is in good condition.

This is a work dealing with the Method of Meditation to be practiced by Sannyāsins. The author of this work is Kṛṣṇānanda the famous author of Siddhāntasiddhāñjanam. There is a commentary written by one Ayyādhvarin who calls himself the desciple of Kṛṣṇānanda.

॥ और्ध्वदेहिकसंस्कारनिर्णयः ॥

11817. AURDVADEHIKASAMSKĀRANIRṆAYAḤ.

S. K. Collection No. 296. Paper. 6¾ × 8½ inches. Sheet —1. Lines—30 to a Page. Devanāgarī. No. of Granthas —25. Raghubhaṭṭa. Complete. Not printed.

Beginning :

और्ध्वदेहिकसंस्कारादौ पुत्रपौत्राद्यधिकारिण उक्ताः । तेषु । औरसपुत्रस्य वर्षात्पूर्वं नाधिकारः । निर्णयसिन्धौ । पुत्रश्च न जन्मतोऽधिकारी । किं तु वर्षोत्तरमिति काला-दर्शः । चौलादाद्याब्दिकादर्वाङ् न कुर्यात्पैतृमेधिकम् ।

End:

पित्रादिमृतौ सत्यां तदौर्ध्वदेहिकसंस्कारं समनन्तरा-धिकारिणा कारयित्वोक्ताधिकारप्राप्त्यनन्तरं पुत्रादयः स्वयमेव पित्रादिश्राद्धादिकं कुर्युरिति सिध्यतीति ॥

Colophon:

इदं रघुभट्टकृतम् । और्ध्वदैहिकसंस्कारस्याधिकारनिर्णयः समाप्तः ॥

Remarks:—The Ms. is in good condition.

॥ अन्त्येष्टिपद्धतिः ॥

11818. ANTYEṢṬIPADDHATIḤ.

Burnell's Catalogue No. 8419. Paper. 9⅛ × 4¼ inches. Sheets—41. Lines—11-15 to a Page. Devanāgarī. No. of Granthas—1000. Nārāyaṇabhaṭṭa. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ।

भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ।
नत्वा शिवौ संविचार्य तनुतेऽन्त्येष्टिपद्धतिम् ॥

आसन्नमरणादिकं पित्रादिकं पुत्रादिर्न्तीर्थे नीत्वा प्रायश्चित्तं कारयेत् ।

End:

सगर्भदहने ह्यस्या वर्णजं वधपातकम् ।
प्रायश्चित्तं चरित्वा तु शुध्यन्ते पापकारिणः ॥
दग्ध्वा तु गर्भसंयुक्तां त्रिरब्दं कृच्छ्रमाचरेत् ।
इत्यादि ग्रन्थान्तरतोऽवगन्तव्यम् ।
भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ।
संक्षिप्य निर्ममौ काश्यामौर्ध्वदैहिकपद्धतिम् ॥
आश्वलायनमार्गेण सन्ति पद्धतयः शतम् ।
ताभ्यस्त्वस्या विशेषो यः पण्डितैरवधार्यताम् ॥

Colophon:

इति श्रीभट्टरामेश्वरसूरिसूनुभट्टनारायणकृतायामौर्ध्वदैहिकपद्धतौ पञ्चकादिमरणविधानानि ॥

श्रीशंकरार्पणमस्तु ॥ शुभमस्तु ॥

Remarks:—The Ms is in good condition. It deals with the funeral rites.

ANTYEṢṬIPADDHATIḤ.

Descriptive No.	Collection No.		Substance.	Script.	Remarks.
11819	J. L.	1110	P.	De.	Complete.
11820	T. S.	251	,,	,,	,,
11821	J. L.	1111	,,	,,	,,
11822	K. S. M.	223	,,	,,	,,
11823	Not noticed by Burnell. Ms.	15724	,,	,,	Incomplete.
11824	J. L.	1112	,,	,,	,,
11825	B. L.	3417	,,	,,	Complete.
11826	,,	3183	,,	,,	,,
11827	,,	2665 b	,,	,,	,,
11828	G. K. D.	30	,,	,,	,,
11829	,,	30 a	,,	,,	,,
11830	J. L.	1113	,,	,,	,,

DETAILED REMARKS

on the MSS. IN THE ABOVE TABLE.

11819 Colophon—

इति शके १६०६ रक्ताक्षिनामसंवत्सरकार्तिक वद्य दशमी भृगुवासरे तद्दिने समाप्तम् ॥ भवानीशंकरार्पणमस्तु ॥

11822 Colophon—

इति भट्टरामेश्वरसूनुना नारायणभट्टेन कृतायां और्ध्वदेहिकपद्धतौ मरणविधानानि ।

शके १६०४ कृष्णभट्टेन लिखितं कागळकरशेषनारायणेन क्रीतं
शेषभट्टस्य ।

भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ।
व्यधत्त रुचिरां काश्यामौर्ध्वदैहिकपद्धतिम् ।
आश्वलायनमार्गेण सन्ति पद्धतयः शतम ॥
ताभ्यस्त्वस्या विशेषो यः पण्डितैः सोऽवधार्यताम् ।
इति + मरणविधानानि ॥

॥ उत्सर्जनोपाकरणप्रयोगः ॥

11831. UTSARJANOPĀKARAṆAPRAYOGAḤ.

Burnell's Catalogue No. 2739. Paper. 8½ × 8½ inches. Sheets—12. Lines—9 or 10 to a Page. Devanāgarī. No. of Granthas—216. Rāmakṛṣṇabhaṭṭa. Complete. Not printed

Beginning:

श्रीगणेशाय नमः ॥ अथोपाकरणविधिः ।
धनिष्ठासंयुते कुर्याच्छ्रावणं कर्म तद्भवेत् ।
तत्कर्म सफलं ज्ञेयमुपाकरणसंज्ञितम् ॥ १ ॥
श्रवणेन तु यत्कर्म उत्तराषाढसंयुतम् ।
संवत्सरे कृतोऽध्यायस्तत्क्षणादेव नश्यति ॥ २ ॥
गार्ग्यः ॥

End:

अस्य ब्रह्मचारिणो वेदग्रहणादिसिद्धिद्वारा श्रीपरमेश्वर-प्रीत्यर्थमुपाकरणं करिष्य इति संकल्प्य गणेशपूजनस्वस्ति-पुण्याहवाचननान्दीश्राद्धानि कृत्वा यज्ञोपवीतान्तेन तानि कटिसूत्रकौपीनवस्त्रमेखलादण्डाजिनानि धारयेत् ॥

Colophon:

इति श्रीमद्विद्वद्वृन्दवन्द्यपादश्रीरामेश्वरभट्टसूरिसूनुविद्वन्मुकुटमाणिक्य-नारायणसुतरामकृष्णभट्टविरचित उत्सर्जनोपाकरणप्रयोगः ॥

शके १५८१ विकारिसंवत्सरे आषाढवदि दशमीशनौ इदं पुस्तकं समाप्तम् ।

Remarks:—The Ms. is in good condition. After the colophon is given:

मानुषे देवखाते वा अप्रवाहोदकं भवेत् ।
निमज्जेन्नित्यतस्तत्र सूर्याभिमुखतः शुचिः ॥

गङ्गायां भास्करक्षेत्रे मातापित्रोः क्षयेऽहनि ।
आधाने सोमपाने च षट्सु क्षौरं विधीयते ॥

UTSARJANOPĀKARMAPRAYOGAḤ.

Descriptive No.	Collection No.		Substance	Script.	Remarks.
11832	B. L.	3524	P.	De.	Complete.
11833	,,	3525	,,	,,	,,
11834	,,	2729	,,	,,	,,
11835	,,	2741	,,	,,	,,
11836	T. S.	317	,,	,,	,,
11837	B. L.	2740	,,	,,	,,
11838	,,	2744	,,	,,	,,
11839	,,	2743	,,	,,	,,
11840	,,	3211	,,	,,	,,
11841	T. S.	284	,,	,,	,,
11842	,,	484	,,	,,	,,
11843	P. A.	170	,,	,,	,,
11844	B. L.	2726	,,	,,	,, Utsarjanaprayogaḥ only

UTSARJANOPĀKARMAPRAYOGAH (Contd.)

Descriptive No.	Collection No.		Substance.	Script.	Remarks.
11845	B. L.	2727	P.	De.	Complete.
11846	„	2728	„	„	„
11847	„	2730	„	„	„
11848	„	2731	„	„	„
11849	„	2732	„	„	„
11850	„	3221	„	„	„
11851	„	3523	„	„	„
11852	T. S.	282	„	„	„
11853	„	309	„	„	„
11854	„	316	„	„	„
11855	„	310	„	„	„
11856	B. L.	2733	„	„	Complete Upākarmaprayoga only
11857	„	2734	„	„	„ „
11858	„	(?) 283	„	„	„ „
11859	„	2736	„	„	„ „
11860	„	2737	„	„	„ „
11861	„	2738	„	„	„ „
11862	„	2742	„	„	„ „
11863	„	3210	„	„	„ „
11864	„	3224	„	„	„ „
11865	„	3225	„	„	„ „
11866	„	9495 f	Pl.	„	„ „
11867	T. S.	348	P.	„	„ „

DETAILED REMARKS

on the MS. IN THE ABOVE TABLE.

11854 Colophon:—

इदं पुस्तकं शिवभट्टनागेश्वरात्म्बेकरस्य । स्वार्थं परार्थं च लिखितम् ॥

11855 Colophon:—

इति धर्म...वाहनं समाप्तम् ॥

रक्ताक्षिसंवत्सर आषाढवद्य अष्टमिन्दुवासरे तद्दिने सरस्वत्युपनाम्ना नारायणेन भट्टेन लिखितं स्वार्थं परार्थं च ॥ इत्युत्सर्जनोपाकर्मप्रयोगः ॥

11858 Colophon —

इत्युपाकर्मप्रयोगः । इदं पुस्तकं गङ्गभट्टात्मजभुजंगाख्यस्य ।

॥ कारिकारत्नम् ॥

11868. KĀRIKĀRATNAM.

Burnell's Catalogue No. 9483. Palm leaf $16\frac{1}{2}\times1$ inches. Leaves—27. Lines—8 to a Page. Grantha. No. of Granthas—900. Author—? Incomplete. Not printed.

Beginning:

....कल्पयेद्दर्भं परमं लौकिकं ततः ।

स्वीकरोत्युपयोगार्थं पादमात्रांशुकं सुतः ।

तस्य पाणिपादाङ्गुष्ठ.................... ॥

औदुम्बर्यामिथासन्द्यां संस्तीर्य...लोमकम् ।

कृष्णाजिनमिह प्रेतं तमुत्तानं निवेशयेत् ॥

End:

अखण्डकालादर्शादावौर्ध्वदैहिकसंग्रहः ।

स्मृत्यर्थसारः शिष्टानामाचारस्मृतिसंग्रहः ॥

क्षोणीबाण...न्दुसंख्ये शकाब्दे मेषं पूषण्याश्रिते पूष-
वारान्हस्तोपेतान्कारिकारत्नमेतत् कृत्वा स्मार्तं पूरितं बह्वृ-
चानाम् । हरिः ॐ ॥ शुभमस्तु ॥ पुण्डरीकाक्षाय नमः ।

Colophon:

कारिकारत्नं संपूर्णम् । नमः शौनकाय ।

क्रोधिसमे कुम्भमासे शुक्लपक्षे नवम्यामिदं कारिकारत्नं लिखित्वा समाप्तम् । अयं ग्रन्थः काश्यपगोत्रस्य अनन्तभट्टपुत्रस्य वेङ्कटाद्रेः । हरिः ओम ॥

Remarks:—The Ms. is in a fairly good condition After the colophon there is a loose leaf bearing the same topic. The Ms. belongs to one Veṅkaṭādri son of Anantabhaṭṭa.

॥ कुण्डार्कः ॥

11869. KUṆḌĀRKAḤ.

P. A Collection No 69. Paper. 10¼ × 1¾ inches Sheets—2. Lines—11 to a Page. Devanāgari. No. of Granthas—50. Śaṅkara. Incomplete, Not printed.

Beginning:

श्रीगणेशाय नमः ॥

भास्वन्तं नीलकण्ठं पितरमनुसरञ्छंकरो वक्ति कुण्डं
भू१ द्वय२ ब्ध्य४ ष्ट्रा६ ष्ट८ हस्तं दशशत १००० हवनाद्वादश-
प्रोच्चरे स्यात् ॥

हस्तः स्यादूर्ध्वबाहोः प्रपदगमखिनः पञ्चमांशोऽङ्गुलं त-
त्सिद्धांशस्तद्गजांशो ८ यव उरग ८ लवस्तस्य यूकाष्टलिक्षा ॥१॥

End:

स्युर्बृत्तव्यासवर्गात्रि ३ यम २ कुचरणाभ्रंशखाद्व्यं ४० ग्रयुक्तौ
रामाश्वांशौ ३५।७ शरांशो नगकुलवियुक्त्यस्ततो बाहुवर्गाः

दोर्घ्ने दोर्भ्यासकृत्योः स्वपदमिह फलं स्याच्चतुर्णां त्रिदोर्भ्यां

पादाभ्यांत्र्चदोर्भ्यामिति मितिमवदच्छङ्करो नैलकण्ठिः ॥ १५ ॥

Colophon:

इति कुण्डार्कः समाप्तः ॥ श्रीरस्तु ॥ शुभं भवतु ॥

योगाज्जाते ग्राममेलाव्य संज्ञे

योऽभूद्विप्रो दत्तगङ्गादिसंज्ञः ।

तत्पुत्रोऽहं स्यात्मानेश्वरेण

.... ॥

Remarks:—The Ms. is in good condition. This is a work giving the measurements of the various dimensions of a homakuṇḍa. The author calls himself the son of Nīlakaṇṭha. At the end there are verses perhaps referring to the scribe who mentions that he belonged to a village called Elāvya and that he was the son of one Gaṅgādatta.

॥ कुण्डार्कमणिदीपिका—सव्याख्या ॥

11870. KUṆḌĀRKAMAṆIDĪPIKĀ—SAVYĀKHYĀ.

J L Collection No. 1112. Paper. 13×5½ inches. Sheets—24. Lines—9-13 to a Page. Devanāgarī, No. of Granthas—900. Balabhadrasūri, Incomplete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

स्मृत्वा श्रीनृहरिं शशाङ्कविलसत्फालं सुरैर्वन्दितं

त्र्यक्षं कोटिरविप्रभं निजरुचा सूत्रस्य रक्षोगणम् ।

विद्युत्पुञ्जसटं पिनाकवरयुग्रत्नोल्लसद्भूषणं

तस्मात्संप्राप्य मतिं स्वनिर्मित इमां टीकां तनोमि स्फुटाम् ॥

नत्वाच्युतब्रह्ममहेशमूर्तीरिष्टेषु पूर्तेषु यदङ्गमाद्यम् ।

साङ्गं समं कुण्डमनेकभेदं ब्रूतेऽखिलं तद्बलभद्रसूरिः ॥

श्रीगेणशाय नमः ।

अत्र श्रीबलभद्रसूरिः अच्युतब्रह्ममहेशमूर्तीन्नत्वा साङ्गं कुण्डं ब्रूते विशद्य वदति किंलक्षणं तत्कुण्डं साङ्गं कण्ठमेखलानालानाभियोनियुक्तं मण्डपादियुक्तं च पूर्वकृतग्रन्थेभ्यो विशेषेण सूक्ष्मक्षेत्रफलवत् यदिष्टेषु पूर्तेषु आद्यं मुखामङ्गयच्छारदातिलके—

End:

त्रिगुणं चन्द्रांशाधिकत्रयाङ्गुलव्यासे वृद्धिः तेन पञ्चदशाङ्गुलानि त्रियवत्रियूकैकलिप्याव्यासार्धं १५।३।३।१। इदमेव द्विगुणं पूर्णो व्यासः ।३०।६।६। २ व्यासस्य वर्गेन नवाग्निविघ्न इत्यनेन व्यासवर्गः ॥ ९५९

Remarks:—The Ms. is in good condition. This Ms. abruptly ends with the 84th śloka. Here and there some diagrams showing the methods of Kuṇḍas are given. This is a commentary on a work by Balabhadrasūri called Kuṇḍārkamaṇidīpikā. The name of the commentator is not known. This work deals with various kinds of Kuṇḍas used in various kinds of sacrifices.

॥ कुण्डमण्डपकौमुदीव्याख्या—आलोकः ॥

11871. KUṆḌAMAṆḌAPAKAUMUDĪ-VYĀKHYĀ--ĀLOKAḤ.

Burnell's Catalogue No. 237. Paper. 11×6 inches. Sheets—88 Lines—9 to a Page. Devanāgarī. No. of Granthas—650. Śivasūri. Incomplete. (I Pariccheda only). Not printed.

Beginning:

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥

श्रीत्र्यम्बकाय गुरवे नमः ॥ श्रीरेणुकायै नमः॥

परमहंसहृदयनन्दनं चित्सुखमन्दनं सुनन्दनं शिवयोः ।
सिन्धुरवन्धुरवदनं साधितविघ्नाद्रिभेदनं कलये ॥ १ ॥

किसलयकोमलपाणिं मञ्जुलवाणीं नमामि तां वाणीम् ।
काणीकृतनिखिलैणां मधुपश्रेणीसमानशुभवेणीम् ॥ २ ॥

त्र्यम्बकदेशिककृपया प्रविदितशास्त्रः शिवाभिधः कुशलः ।
रचयति कुण्डालोकं साधुमुदे कुण्डकौमुदीविधृतिम् ॥ ५ ॥

अथ चिकीर्षितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारप्रणीतं प्रत्यूहनिवारणनिपुणवारणवदनचरणशरणालम्बनरूपं मङ्गलं ग्रन्थतो निबध्नाति ॥ लम्बोदरेति ॥

End:

मण्डपमुपसंहरति ॥ इत्थमिति ॥

इत्थं सकलग्रन्थान्परिभाव्य शिवेन देशिकेन्द्रमुखात् ।
मण्डपरचनारीतिः सम्यक्कथितास्तु सा सतां तुष्टयै ॥ ५० ॥

इत्थं प्रकारेण सकलग्रन्थान्वास्तुशास्त्रगणितागमहेमाद्रिमयूखादिनिबन्धनानि देशिकेन्द्रस्य श्रीमद्गुरोस्त्र्यम्बकस्य मुखात्सत्संप्रदायोपदेशात् शिवेन मया परिभाव्य फलसंवादेनालोच्य मण्डपरचयारीतिः कथिता मण्डपनिर्माणप्रकारः । साधु निरूपितः । सा रीतिः । सतां निर्मत्सराणां तुष्टयै अस्तु ॥ तोषाय भवतु ॥ मत्कृतप्रयासं ज्ञात्वा

ते तुष्यन्त्विति भावः। निर्मत्सरैः शोधितं वस्तु लोके उपादेयं भवतीति तात्पर्यम् ॥

Colophon:

इति श्रीमन्महाजनकुलकलशीजलनिधिशरद्राकाचन्द्रेण श्रीत्र्यम्बकभट्ट-पुत्रेण स्वकृतकुण्डमण्डपकौमुदीव्याख्याने आलोकाभिधाने मण्डप-रचनाप्रकारो नाम प्रथमः परिच्छेदः।

Remarks:—The Ms. is in good condition. This is a commentary by one Śivasūri called Āloka on his own work called Kuṇḍa-maṇḍapakaumudī. The author mentions one Tryambaka as his guru. But this Tryambaka seems to be his father also as is gleaned from a verse in Kuṇḍacamatkṛtivyākhyā written by Vāsudeva his own son. The work contains only 2 paricchedas. The author mentions Hemādri and Mayūkha.

KUṆḌAMAṆḌAPAKAUMUDĪVYĀKHYĀ—ĀLOKAḤ.

Descriptive No.	Collection No.		Substance.	Script.	Remarks.
11872	B. L.	238	P.	De	Incomplete. I Pariccheda only.
11873	J. L.	1114	,,	,,	,,
11874	,,	1115	,,	,,	,,
11875	B. L.	239	,,	,,	,, II Pariccheda only.
11876	,,	240	,,	,,	,,

DETAILED REMARKS

on the MSS. IN THE ABOVE TABLE.

11873 After the Colophon is seen :

शालिवाहनशके सर्वधारिणि हायने।
श्रावणाद्यप्रतिपदि ग्रन्थः संपूर्णतामगात् ॥

॥ कुण्डमण्डचन्द्रिका ॥

11877. KUNDAMANDAPACANDRIKĀ.

J. L. Collection No. 1116. Paper $10\frac{3}{4} \times 5$ inches. Sheets—13. Lines—6 to a Page. Devanāgarī. No. of Granthas—93. Yajñasūri. Complete Not printed.

Beginning:

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥

श्रीमद्दिव्यलक्ष्मीनृसिंहाय नमः ॥ श्रीरस्तु ॥ श्रीविश्वनाथ ॥

प्रणिपत्य जगद्वन्द्यं नृसिंहं बुद्धिदायकम् ।

तथैव हि महालक्ष्मीं वक्षस्थलनिवासिनीम् ॥ १ ॥

नत्वा श्रीविश्वनाथाख्यं पितरं यज्ञसूरिणा ।

शिष्टेष्टतुष्टये क्रियते कुण्डमण्डपचन्द्रिका ॥ २ ॥

तत्र परिभाषा ॥

जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः ।

तद्रजः परमाणुः स्यात्त्रसरेणुर्महारजः ॥ ३ ॥

End:

अनुक्तसाधनैः क्लृप्तो यदि वा कुटिलाकृतिः ।

मानाधिकोऽथ वा न्यूनो मण्डपः कर्तृनाशनः ॥ ६६ ॥

आख्यातसाधनैर्युक्तः सरलः स ममानकः ।

मनोज्ञो मण्डपो योऽसौ कर्मकर्तुः शुभावहः ॥

Remarks:—The Ms. is in good condition. It abruptly breaks off in the 67th śloka. The author mentions Viśvanātha as his father. No other particular can be known from the Ms.

॥ कुण्डसिद्धिः ॥

11878. KUNDASIDDHIH.

T. S. Collection No. 300. Paper. $9\frac{3}{4} \times 4$ inches. Sheets—6.

Lines—8 to a Page Devanāgarī. No. of Granthas—75. Viṭṭhaladīkṣita. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥ श्रीरविं नमाम्यहर्निशम् ॥

यज्ञेशं यज्ञपुरुषं यज्ञविद्भिः सुपूजितम् ।
यज्ञानां फलदातारं नमामि तमहं सदा ॥ १ ॥

गाढध्वान्तमनेकभानुजठरे राजत्कलाधारिणि
प्रोद्यच्छफरीयुगं दरदलत्पद्मेणुहीरावलिः ।
स्वर्णोत्तुङ्गगिरिद्वयाधरचरी दीना कलिन्दात्मजा
पश्याश्चर्यमिदं शिवामिति वदन्स्मेरः शिवः पातु वः ॥

कृष्णात्रिगोत्रे नितरां पवित्रे पवित्रकर्माजनि बूवशर्मा ।
तत्सूनुना विट्ठलदीक्षितेन विरच्यते मण्डपकुण्डसिद्धिः ॥ २ ॥

End:

शशियुगतिथिगण्ये याति शाके वरेण्ये
विमलशरदि रम्ये मासि शस्ये तपस्ये ।
शशधरभृति दक्षेऽमुष्य पक्षे वलक्षे
कमलनयनतिथ्यां भानुमद्वारवत्याम् ॥ ५७ ॥

Colophon:

सङ्गमेरस्थ विट्ठलदीक्षितविरचिता कुण्डसिद्धिः समाप्ता ॥

Remarks:—The Ms. is in good condition. After the colophon are given the following two ślokas 58th and 59th.

ग्रन्थे परोक्ते मम दूषणोक्त्या
किं वा गुणोक्त्या विदुषा विचार्य ।
ग्रन्थे मदुक्ते........विशोध्यं
स वस्तु सर्वं न हि वेद कश्चित् ॥ ५८ ॥

अङ्गीकार्या मत्कृतिर्निर्मलेयं कस्मादेवं पण्डितान्प्रार्थयेऽहम् ।
क्षीरं पेयं नीरमेतद्विहाय को वा विज्ञं हंसमज्ञोऽर्थयेत ॥ ५९ ॥

After this a diagram of स्थण्डिलमानं also is given.

The author belongs to Kṛṣṇātrigotra and calls himself the son of Būbaśarman. This Viṭṭhala Dīkṣitá should be distinguished from the author of this same name son of Vallabhācārya otherwise called Gosanyji. The author mentions himself as belonging to Mādhyandinaśākhā in the commentary of this work which he has himself written. He is a North Indian and wrote this work in Benares as he says in one of the concluding verses. The author appears to have written this in A. D. 1430.

॥ कुण्डसिद्धिव्याख्या—समूला ॥

11879 KUṆḌASIDDHIVYĀKHYĀ—SAMŪLĀ.

Burnell's Catalogue No. 283. Paper. 9½×5 inches. Sheets —26. Lines—11 to a Page. Devanāgarī. No. of Granthas —715. Viṭṭhaladīkṣita. Complete. Not printed.

Beginning:

श्रीमहादेवाय नमः ॥

मत्तमतङ्गजवदनं सादितविघ्नावलीसदनम् ।
गौरीहरयोस्तोकं पालितलोकं हृदालम्बे ॥

*   *

कुण्डमण्डपसंसिद्धेर्विवृतिं स्वलिखोक्तिषु ॥
प्राचीनकल्पसंदर्भं संदर्शयितुमारभे ॥

इह जगति शिष्टा ग्रन्थारम्भे स्वेष्टदेवतानमस्कारादिरूपं मङ्गलमाचरन्ति । तस्मान्माध्यंदिनीयो विठ्ठलशर्मा कुण्ड-

सिद्धिं चिकीर्षुः स्वाभीष्टदेवतास्मरणमाशीरूपं मङ्गलमाच-
रति शार्दूलविक्रीडितेन ॥

गाढध्वान्तमनेकभानुजठरे राजत्कलाधारिणि
प्रोद्यच्छफरीयुगं दरदलत्पद्मेणुहीरावलिम् ।
स्वर्णोत्तुङ्गगिरिद्वयाधरचरीं दीनां कलिन्दात्मजां
पश्याश्चर्यमिदं शिवामिति वदन्स्मेरः शिवः पातु वः ॥

End:

इति मण्डपकुण्डसिद्धिमेनां रुचिरं विट्ठलदीक्षितो व्यधत्त ।
अधिकाशिनगर्युमेशतुष्ट्यै विबुधः शोधयतामिमं विचार्य ॥ ५६ ॥
अथेयं मत्कृतिरुमेशतोषायेति वसन्ततिलकया आह । इतीति०

शशितिथियुगगण्ये याति शाके वरेण्ये
विभवशरादि रम्ये मासि शस्ये तपस्ये ।
असितरभृति दक्षेऽमुष्य पक्षे वलर्क्षे
कमलनयनतिथ्यां भानुमद्वारवत्याम् ॥ ५७ ॥
ग्रन्थे परोक्ते मम दूषणोक्त्या किं वा गुणोक्त्या विदुषो विचार्य ।
ग्रन्थे मदुक्ते सदसद्विशोध्यं सर्वस्तु सर्वं न हि वेद कश्चित् ॥ ५८ ॥
अङ्गीकार्या मत्कृतिर्निर्मलेयं कस्मादेवं पण्डितान्प्रार्थयेऽहम् ।
क्षीरं पेयं नीरमेतद्विहाय को वा शिक्षं हंसमभ्यर्थयेत ॥ ५९ ॥

व्या ॥ शशियुगेति ॥ ५७ ॥ व्यधत्तेति पूर्वश्लोके ना-
न्वयः ॥ ५८ ॥ ५९ ॥

Colophon:

इति संगमने...रस्य विठ्ठलदीक्षितविरचिता कुण्डसिद्धिः समाप्ता ॥
श्रीः मृत्युंजयार्पणमस्तु ॥ श्रीरस्तु ॥

इति संगमने....रस्य विट्ठलदीक्षितविरचिता कुण्डसिद्धिव्याख्या समाप्ता ॥

श्रीकृष्णार्पणमस्तु ॥

Remarks:—The Ms. is in good condition. This is the commentary on Kuṇḍasiddhi by the author himself.

KUṆḌASIDDHIVYĀKHYĀ—SAMŪLĀ.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
11880	B. L. 236	P.	Dev.	Complete.
11881	J. L. 1117	„	„	Incomplete.

॥ कुण्डचमत्कृतिव्याख्या—नृसिंहकुण्डाशयः ॥

11882. KUṆḌACAMATKṚTIVYĀKHYĀ—NṚSIṂHAKUṆḌĀŚAYAḤ.

J. L. Collection No. 1118. Paper, 10×4½ inches, Sheets—11. Lines—9 to a Page. Devanāgarī. No. of Granthas—210. Vāsudeva. Incomplete. Not printed.

Beginning:

श्रीनृसिंहाय नमः ॥ श्रीगणनायकाय नमः ॥

वन्दे श्रीगणनाथं गजमनुजाभेदबोधनसमर्थम् ।
प्रत्यूहवारणार्थं शरणं यामः स्वदन्तपुरुषार्थम् ॥ १ ॥

निखिलाक्षरमयदेहां दापितसकलपुरुषार्थसंदोहाम् ।
विनिवारितसंदेहां वाणीं नौमि भूतभक्तवृन्देहाम् ॥ २ ॥

प्रणम्य परमां देवीं रेणुकां कुलदेवताम् ।
तथा निजगुरुं श्रीमत्त्र्यम्बकं च पितामहम् ॥ ३ ॥

महाजनकुलाम्भोधिशरद्राकासुधांशुना ।
श्रीमत्त्र्यम्बकपौत्रेण पुत्रेण शिवसूरिणः ॥
वासुदेवेन सुधिया व्याख्या कुण्डचमत्कृतेः ।
लोकोपकृतये सम्यक्क्रियते च यथामति ॥

अथ ग्रन्थकृत्प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं शिष्टाचारपरंपराप्राप्तं निजेष्टदेवताभजनरूपं मङ्गलं ग्रन्थतो निबध्नाति ॥ अमूर्तिमिति ॥

End:

शङ्खचक्रगदाब्जानि स्थापयेत्तोरणोपरि ।

स्तम्भस्य तोरणस्तम्भस्य अर्धमाने अर्धप्रमाणे फलके तिर्यक्फलके तिर्यक्नासाख्ये काष्ठे । अधमे सार्धद्विहस्तं मध्यमे सार्धत्रिहस्तम् ॥

Remarks—The Ms. is in good condition. It abruptly breaks off at the 24th śloka.

This author mentions the following geneology:

Tryambaka
|
Śivasūrin
|
Vāsudeva.

He appears to be the son of the author of Kuṇḍamaṇḍapakaumudī as can be made out by the above geneology.

॥ कुण्डलक्षणम् ॥

11883. KUṆḌALAKṢAṆAM.

Burnell's Catalogue No, 3497. Paper. 9⅞ × 4 inches. Sheets—7. Lines—11-14 to a Page. Devanāgarī. No. of Granthas—130. Rāma Complete. Not printed.

Beginning:

इष्टापूर्तेष्वङ्गमाद्यं यदाहुर्यस्योनत्वाधिक्यतो भूरिदोषाः ।
कुण्डं साङ्गं भूरिभेदं तदत्र ब्रूते रामो नैमिशस्थो विचार्य ॥

त्रसरेणूरथ रेणुर्वाळाग्रं तदनु लिक्षा च ।
यूका यवोऽङ्गुलमिति परमाणोः क्रमतोऽष्टगुणितानि ॥

End:

नवमस्य मानम् । यवेनोनाश्च षट्पर्वताः ॥ ७६ ॥
षट्सप्ततिरङ्गुलानि दशमस्य मानम् ।
इत्यादि ज्ञेयम् ॥

Remarks:—The Ms. is in a fairly good condition. This is a small work on the preparation of Kuṇḍa and the author mentions his name as Rāma living in Naimiśa.

॥ कुण्डरचनारीतिः ॥

11884. KUṆḌARACANĀRĪTIḤ.

J. L. Collection No. 1119. Paper. $10\frac{1}{2}\times3\frac{3}{4}$ inches. Sheets —9. Lines—7 to a Page. Devanāgarī. No. of Granthas —120. Bālasūri. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

शेषभट्टं च पितरं नत्वा गौरीपतिं तथा
कुण्डानां रचनारीतिस्तन्यते बालसूरिणा ॥

तत्र कुण्डानां स्थानानि ।

चतुरश्रं योनिकुण्डमर्धचन्द्रं त्रिकोणकम् ।
वृत्तं षडश्रकमलमष्टाश्रं शक्र...क्रमात् ॥

तथैव चतुरश्रं च कुर्याच्छक्रेशमध्यतः ।

End:

नवमं चतुरश्रकुण्डं तूक्तमेव वृत्तकुण्डपक्षे पूर्वोक्तवृत्त-
कुण्डवत्कार्यम् ॥ ९ ॥ अथ सर्वत्र चतुरश्रादिसकलकुण्ड-
क्षेत्रप्रमाणं कुण्डार्कादिग्रन्थेभ्योऽवधयेम् ।

Colophon:

इति कुण्डरचनारीतिः समाप्ता ॥

Remarks:—The Ms. is in a fairly good condition. Nothing more is known about the author.

॥ कुण्डस्वरूपस्थानानि ॥

11885. KUṆḌASVARŪPASTHĀNĀṆI.

J. L. Collection No. 1120. Paper. 10¾×5 inches. Sheets —31. Lines—9 to a Page. Devanāgarī. No. of Granthas —845 Incomplete. Not printed.

Beginning:

श्रीनृसिंह ॥ अथ कुण्डानां स्वरूपस्थानानि ॥

वेदीपादान्तरं त्यक्त्वा कुण्डानि नव पञ्च च ।
चत्वारि वाथ चैकं वा स्थण्डिलं वा विधानतः ॥
वेदास्रीण्येव तानि स्युर्वृत्तनानाकृतीनि च ।
नवकुण्डविधानेन दिक्षु कुण्डाष्टके स्थिते ॥
नवमं कारयेत्कुण्डं पूर्वेशानदिगन्तरे ।

End:

योनिकण्ठौ न कर्तव्यौ कुण्डवत्सम्भवेदिभिः ।
इदं तु स्थण्डिलं ज्ञेयमन्यहोमेन चाधिके ॥

Remarks:—The Ms. is in a fairly good condition. The name of the author is not known. This Ms. abruptly breaks of at the स्थण्डिलकरण ।

॥ कुण्डमण्डपनिर्माणम् ॥

11886. KUṆḌAMAṆḌAPANIRMĀṆAM.

Burnell's Catalogue No. 235. Paper. 10×4¼ inches. Sheets—6. Lines—9 to a Page. Devanāgarī. No. of Granthas—135. Incomplete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

लक्ष्मीकान्तपदद्वन्द्वमाधाय हृदयाम्बुजे ।
कुण्डमण्डपनिर्माणमथ वक्ष्ये सतां मुदे ॥ १ ॥
गृहस्योत्तरपूर्वेण मण्डपं कारयेद्बुधः ।
रुद्रायतनभूमौ वा चतुरश्रमुदक्प्लवम् ॥ २ ॥

End:

प्रकल्प्य तत्तदष्टांशान्यवयूकादिकामपि ।
कुर्याद्योन्यादिकुण्डानि मेखलाद्यपि पूर्ववत् ॥ ७३ ॥
कुण्डमण्डपनिर्माणप्रकारोऽयं समासतः ।
उदीरितः सदा भूयाद्वासुदेवस्य तुष्टये ॥ ७४ ॥

Colophon: Nil.

Remarks:—The Ms. is in good condition. At the end is given the formation of चतुर्भुज beginning with:—

अथ चतुर्भुजान्प्रदर्शयाम: ॥ एकहस्ते अंगुलानि २४ ॥ द्विहस्ते ३३।
७।४।१ त्रिहस्ते।४१।४।७।३। चतुर्हस्ते ४८ ॥ +
प्रयुते तु चतुर्हस्तं कोटिहोमे तु षट्करमिति। हस्तमितकुण्डविधे-
र्घृतपुष्पादिहोमविषय एव ॥

There is no clue to know the name of the author.

॥ कुण्डमण्डपनिर्णयः ॥

11887. KUNDAMANDAPANIRNAYAH.

Burnell's Catalogue No. 234. Paper. 9×4½ inches. Sheets—22. Lines—10 or 11 to a Page. Devanâgarî. No. of Granthas—350. Nîlakanṭhâ. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

उक्त्वा श्रीनीलकण्ठाख्यः परिभाषादिकं पुरः ।
दानाद्यौपयिकं कुण्डं मण्डपादि वदत्यथ ॥ १ ॥

तत्र भूमानमादित्यपुराणे ।

जालान्तरं गते भानौ यत्सूक्ष्मं दृश्यते रजः ।
प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते ॥

End:

नित्यं नैमित्तिकं होमं स्थण्डिले वा समाचरेत् ।
हस्तमात्रेण तत्कुर्याद्वालुकाभिः सुशोभनम् ।
त्र्यङ्गुलोत्सेधसंयुक्तं चतुरश्रं समन्ततं इति ।

Colophon:

कुण्डमण्डपनिर्णयः समाप्तः ॥

Remarks:—The Ms. is in good condition. The author says that he wrote Paribhâṣa first and this as its continuation. Nothing more is known about him.

KUNDAMANDAPANIRNAYAH.

Descriptive No.	Collection No.	Substance.	Script.	Remarks.
11888	B. L. 12328	P.	De.	Complete.
11889	J. L. 1121	,,	,,	,,

॥ औपासनकुण्डप्रमाणविधिः ॥

11890. AUPĀSANAKUṆḌAPRAMĀṆAVIDHIḤ.

T. S. Collection No. 1078. Paper. 10⅛ × 3⅝ inches. Sheet—1. Lines—7 to a Page. Devanāgarī. No. of Granthas—10. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

अरत्निमात्रं विज्ञेयमग्नेरायतनं शुभम् ।
श्रौते चौपासने चापि खातयोनिं विवर्जितम् ॥
मेखलात्रितयं कार्यं रेखालग्नं तु बाह्यतः ।
बाह्याद्‌घ्यङ्गुलविस्ताराभ्यन्तरा चतुरङ्गुला ॥

End.

सङ्ग्रहे तु ।

अरत्निमात्रमग्न्यर्थं कार्यमायतनं बुधैः ।
पिञ्जलिमात्रमित्येके तदप्यंशान्तरं भवेत् ॥
बाह्योरन्तरं पिञ्जलं मेखलादात्रङ्गुलं कुण्डन्यासचतुर्विं-
शांशः ।

Remarks:—The Ms. is in good condition. This work deals with only one kind of Kuṇḍa to be used in Aupāsana. The author's name is not known.

॥ गृह्याग्निसारः ॥

11891. GṚHYĀGNISĀRAḤ.

Burnell's Catalogue No. 728. Paper. 11¼ × 5¼ inches. Sheets—226. Lines—9 to a Page. Devanāgarī. No. of Granthas—4000. Incomplete. Not printed.

Beginning:

केवलपुनःसंधाने तु अग्निविच्छेदादिनादारभ्य एतावन्तं कालं मम गृह्याग्निविच्छेदजनितप्रत्यवायपरिहारद्वारा एतावत्प्रायश्चित्तममुकप्रत्याम्नायेन यथाशक्ति करिष्ये ॥

End:

न्यासः ॥

पट्टवस्त्रं वचो शौर्यं माञ्जिष्ठं श्वेतवस्त्रकम् ।
कम्बलं शानपट्टं चाजिनं च यथोत्तरम् ॥
एषां विकल्पः । अन्यश्च । तत्र विशेषस्त्रिस्थलीसेतौ

भट्ट[......... ... ।

Remarks:—The Ms. is in good condition. This is a compilation of Gṛhyaprayoga by an unknown author.

GṚHYĀGNISĀRAḤ.

Descriptive No.	Collection No.	Substance.	Script	Remarks.
11892	B. L. 729	P.	De.	Incomplete.

॥ ग्रहणश्राद्धविधिः ॥

11893. GRAHAṆAŚRĀDDHAVIDHIḤ.

P. S. Collection No. 185, Paper. 9¾ × 4½ inches. Sheets—10, Lines—7 to a Page. Devanāgarī. No. of Granthas—100. Bhaṭṭojidīkṣita. Complete. Not printed.

Beginning:

अथ ग्रहणश्राद्धविधिः । तत्र श्राद्धस्य स्नानानन्तरभावित्वेन आदौ ग्रहणस्नानं निरूप्यते । ग्रहणं द्वि-

विधं सूर्यग्रहणं चन्द्रग्रहणं चेति ॥

End:

दिवा भुजेर्निषेधे तु रात्रिदोषो न विद्यते । तर्पणदिने रात्रिभोजननिषेधवचनानि रागप्राप्तद्विर्भुक्तपराणीति मदनपारिजाते वृद्धवसिष्ठोक्तेरिति दिक् ॥

Remarks:—The Ms. is in good condition. Bhaṭṭoji Dīkṣita has written some Dharmaśāstra works like Caturviṃśatisaṅgraha.

॥ ग्रहणश्राद्धविधिः ॥

11894. GRAHAṆAŚRĀDDHAVIDHIḤ.

T. S. Collection No 505 Paper. 9 × 3¾ inches. Sheets—2. Lines—9 to a Page. Devanāgarī. No. of Granthas—30. Complete. Not printed.

Beginning:

अथ ग्रहणश्राद्धविधिः ॥ ऋष्यशृङ्गः ।

चन्द्रसूर्यग्रहे यस्तु श्राद्धं विधिवदाचरेत् ।

तेनैव सकला पृथ्वी दत्ता विप्रस्य वै कर इति ॥

भारते ।

End:

सूर्यग्रहे यदा रात्रौ दिवा चन्द्रग्रहस्तथा ।

तत्र स्नानं न कुर्वीत दद्याद्दानं च न क्वचिदिति ।

षट्त्रिंशन्मतात् ।

Remarks:—The Ms. is in good condition. This text differs from the former.

॥ देवतार्चनक्रमपद्धतिः ॥

11895. DEVATĀRCANAKRAMAPADDHATIḤ.

Burnell's Catalogue No. 7805. Paper. $7\frac{1}{2} \times 4\frac{1}{4}$ inches. Sheets—7. Lines—11 to a Page. Devanāgarī. No. of Granthas—140. Caṇḍacaitanyaḥ. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥

प्रणम्य गणपं वाणीं गुरुं कुर्वे लघुक्रमम् ।
पद्धतिं चण्डकः सारीं देवतार्चनसिद्धये ॥
नत्वा देवं गुरुं भूमिं प्रातःस्मरणपूर्वकम् ।
कृत्वा चावश्यकं कर्म करा ङ्घ्रिमुखमार्जनम् ॥

Colophon:

इति चण्डचैतन्यरचिता क्रमपद्धतिः ॥

साधकस्य च तुष्ट्यर्थं संपूर्णा देवतुष्टिदा ॥

Subject: Devatārcanapaddhati a treatise dealing with the way of worshipping the God Śiva.

Remarks:—The Ms is in a fairly good condition. On the title page is given:

"तुकदेवेन लिखिता"

॥ देवतार्चनपद्धतिः ॥

11896. DEVATĀRCANAPADDHATIḤ.

Burnell's Catalogue No. 8118 Paper. $8 \times 1\frac{3}{4}$ inches. Sheets—26. Lines—11 to a Page. Devanāgarī. No. of Granthas—225 Gaṅgādharaḥ. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥

श्रीसाम्बसदाशिवाय नमः ॥ हरिः ओम् ॥

अथ देवतार्चनपूजाविधिर्लिख्यते ॥

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।

* * *

द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।

संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥

End:

अनेन श्रीभवानीशंकरषोडशोपचारपूजनेन भगवा-न्श्रीभवानीशंकरः प्रीयताम् । प्रीतो वरदो भवतु । इष्ट-काम्यार्थसिद्धिरस्तु ।

Colophon:

इति श्रीमद्गङ्गाधरेण विरचितः देवतार्चनवेदोक्तपुरुषोक्तेन षोडशोपचारविधिः समाप्तः ॥ श्रीसाम्बसदाशिवार्पणमस्तु ॥

Subject: Devatārcanapaddhati a treatise dealing with the proceedings of the worship of God Śiva.

Remarks:—The Ms. is in a fairly good condition. After the colophon is given the name of the scribe as follows:

लिखितं कमलाकरदीक्षितात्मजदिवाकरेण ॥

॥ पाकयज्ञनिर्णयः (वैश्वदेवप्रकरणम्) ॥

11987. PĀKAYAJÑANIRṆAYAḤ—VAIŚVADEVAPRAKARAṆAM.

Burnell's Catalogue No. 868. Paper, 6¾ × 4 inches. Sheets—22. Lines—12 to a Page. Devanāgarī. No. of

Granthas—830. Candracūḍabhaṭṭa. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥ अथ सद्यस्कालमाश्रित्य मासि-

श्राद्धप्रयोगः ।

End:

अभावे भूमिरुदकं तृणानि कल्याणी वागित्येतानि

वै सतोऽगारे न क्षीयन्ते कदाचनेति सत्पुरुषस्य निर्धन-

स्यापि गृहे कदाचिदपि न क्षीयन्त इत्यर्थः

Colophon:

इति पौराणिकधर्मभट्टसुतअम्मणभट्टात्मजचन्द्रचूडभट्टकृते पाकयज्ञनि-
र्णये वैश्वदेवं समाप्तम् ॥

Remarks:—The Ms. is in good condition. The author mentions his geneology thus:

Dharmabhaṭṭa
|
Ammaṇabhaṭṭa
|
Candracūḍabhaṭṭa.

॥ प्रयोगचान्द्रिका ॥

11898. PRAYOGACANDRIKĀ.

Burnell's Catalogue No. 9471 a. Palm leaf. 15×1 inches. Leaves—42 (1-42). Lines—6 to a Page. Grantha. No. of Granthas—700 Incomplete Not printed.

Beginning:

श्रीनिवासगुरुं नत्वा सीतां रामं च सानुजम् ।

प्रयोगचन्द्रिकां तेषां करोमि कृपयाधुना ॥

श्रीभूमिनीलादिसमेतं संप्रगम्य गर्भाधानपुंसवनसीम-

न्तजातकर्मनामकरणान्नप्राशनचौलोपनयनव्रतसमावर्तनो-
द्वाहगृहप्रवेशानां तत्र तत्र उदकशान्त्यादीनां प्रयोगो
वक्ष्यते ।

End·

प्रयोगचन्द्रिकामापस्तम्बगृह्यानुसारिणीम् ।
वीक्ष्य न्यूनातिरिक्तानि क्षन्तुमर्हन्ति सज्जनाः ॥
स्तोभाब्दे नभसि श्रेयः कल्याण्येषु मयाधुना ।
प्रयोगचन्द्रिकाकारि सावतारस्य तुष्टये ॥
हरिः ॐ ॥ कश्कृतमपराधं क्षन्तुमर्हन्ति सन्तः ।
हरिः ॐ ॥ श्रीमते । वेदान्तगुरवे नमः ॥

Remarks:—The Ms is in good condition It is not possible to identify the author but he mentions himself as the disciple of one Srīnivāsa and appears to be a Vaiṣṇavite.

PRAYOGOCANDRIKĀ.

Descriptive No.	Collection No.	Substance	Script.	Remarks.
11899	B. L. 9472	Pl.	Gr.	Complete.

॥ प्रयोगदर्पणः ॥

11900. PRAYOGADARPAṆAḤ.

Burnell's Catalogue No. 9471 a. Palm leaf. 15×1 **inches**. Leaves—108 (1-108). Lines—5 to a Page. Devanāgarī. No of Granthas—1500. Incomplete. Not printed:

Beginning·

अथ प्रयोगदर्पणं वक्ष्ये । श्रीवैकुण्ठमिष्यन्ते मुमूर्षु पि-

त्रादि पुत्रादिः शं नो देवीरभिष्टये + कालशक्त्योरनुगुणं यत्किंचित्परिषदनुज्ञापूर्वकं कर्म कारयेत् ॥

End:

विष्णुभक्तेन कर्तव्यमघामार्जनकं परम् । अनेन सर्वदुःखानां सदैव क्षोभम इति

Colophon: Nil.

Remarks—The Ms. is in good condition. It is not known who the author is.

॥ प्रयोगपारिजातम् ॥

11901. PRAYOGAPĀRIJĀTAM.

Burnell's Catalogue No. 5. Paper. 10×5½ inches. Sheets —450. Lines—13 to a Page. Devanāgarī. No of Granthas —15360. Narasimha. Complete. Printed.

Subject: Prayogapārijāta Saṃskārakāṇḍa 1-16 Adhyāyas.

Remarks:—The Ms. is in good condition and is dated A. D. 1693. For the contents see the list kept separately along with this Ms. This work is published at Mysore edited by Rāmaśāstrin and Dvivedi Subrahmaṇyāvadhānin under the name Śrīmannṛsiṃhaprayogapārijātaprakaraṇa.

PRAYOGAPĀRIJĀTAM.

Descriptive No.	Collection No.	Substance	Script.	Remarks.	
11902	B. L. 6	P.	De.	Complete.	Saṃskārakāṇḍa.
11903	„ 7	„	„	„	„
11904	„ 8	„	„	„	„
11905	„ 14	„	„	„	„

PRAYOGAPĀRIJĀTAM (Contd.)

Descriptive No.		Collection No.	Substance.	Script.	Remarks.	
11906	B. L.	18	P.	De.	Complete.	Saṃskāra-kāṇḍa.
11907	„	19	„	„	„	„
11908	„	9239	Pl.	Te.	„	„
11909	„	9240	„	Gr.	„	„
11910	„	9241	„	„	„	„
11911	„	9242	„	Te.	„	„
11912	„	9243	„	„	Incomplete.	„
11913	„	9244	„	„	„	„
11914	„	9214 b	„	„	„	„
11915	„	14	P.	De.	Complete.	Āhnika-kāṇḍa.
11916	„	15	„	„	„	„
11917	„	16	„	„	„	„
11918	„	17	„	„	„	„
11919	„	9	„	„	„	Pākayajña-kāṇḍa.
11920	„	10	„	„	„	„
11921	„	11	„	„	„	„
11922	„	12	„	„	„	„
11923	„	9245	Pl.	Te.	„	„
11924	„	13	P.	De.	„	„

॥ प्रयोगदर्पणः ॥

11925. PRAYOGADARPAṆAḤ.

Burnell's Catalogue No. 9575 a. Palm leaf. 18×1½ inches. Leaves—17 (7-24) Lines—7 to a Page. Grantha. No. of Granthas—22?. Incomplete. Not printed.

Beginning:

श्रीधराद्यस्मदाचार्यपर्यन्तान्प्रणमन्गुरून् ।
प्रयोगदर्पणं कुर्मि दृश्यते येन स स्फुटम् ॥
श्रीवैकुण्ठं गमिष्यन्तं मुमुक्षुं पित्रादक + पुत्रादि०
मन्त्रैः स्नाप्य ।

End:

गर्भवान्मासत्रयादूर्ध्वं क्षौरं शवानुगमनं शवनिर्हरणं समु-
द्रस्नानं श्राद्धभोजनं प्रतिग्रह........ ।

Remarks:—The Ms. is in good condition This treatise deals with the funeral rights and the duties of a Gṛhastha in that respect. The author speaks of a Guruparampará beginning with one Srîdhara.

॥ प्रयोगरत्नम् ॥

11926. PRAYOGARATNAM.

Burnell's Catalogue No. 634. Paper. 8¾×4½ inches. Sheets—290 (157–157 wanting out of 300). Lines—10 to a Page. Devanāgarî. No. of Granthas—4300. Nárâyaṇabhaṭṭa. Incomplete. Not printed.

Beginning :

श्रीरामं सपरीवारं सदानन्दं गुणाकरम् ।
दाक्षायणीप्रियसुतं गणेशं ससरस्वतीम् ॥
आश्वलायनतच्छिष्यान्प्रणम्य पितरं गुरुम् ।
भट्टरामेश्वरसुतो भट्टनारायणः सुधीः ।
प्रयोगरत्नं कुरुते काश्यां शिष्टप्रतुष्टये ॥

End:

कृत्तिकादिषु काम्यश्राद्धं वृत्तिकारमतेनाष्टमीश्राद्धवत्-

सर्वं कार्यम् । यद्वा शौनकोक्तवृद्धिश्राद्धवत् ।

Colophon:

इति नारायणभट्टकृते प्रयोगरत्नेऽष्टकाविकृतिश्राद्धप्रयोगः । इति श्री-
विद्वन्मकुटमाणिक्यशिरोमणिरामेश्वरभट्टसुतनारायणभट्टकृते प्रयो-
गरत्ने अन्वष्टकाः समाप्ताः ।

Remarks:—The Ms. is in good condition. It abruptly breaks off at Anvaṣṭakā. This author calls himself son of Rameśvarabhaṭṭa Raghunātha author of Śrāddhapaddhati gives his grandfather's name as Rameśvarabhaṭṭa. So both these authors seem to belong to the same family.

PRAYOGARATNAM.

Descriptive No.	Collection No.		Substance.	Script.	Remarks.
11927	B. L.	637	P.	De.	Complete.
11928	,,	656	,,	,,	,,
11929	,,	657	,,	,,	,,
11930	,,	658	,,	,,	,,
11931	,,	678	,,	,,	,,
11932	,,	679	,,	,,	,,
11933	J. L.	1122	,,	,,	,,
11934	T. S.	232	,,	,,	,,
11935	S. K.	159	,,	,,	,,
11936	B. L.	338	,,	,,	Incomplete.
11937	J. L.	1123	,,	,,	,,
11938	,,	1124	,,	,,	,,
11939	,,	1125	,,	,,	,,
11940	,,	1126	,,	,,	,,
11941	T. S.	252	,,	,,	,,
11942	,,	306	,,	,,	,,

PRAYOGARATNAM (Contd)

Descriptive No.	Collection No.		Substance.	Script	Remarks.	
11943	J. L.	1127	P.	De.	Incomplete.	
11944	G K D,	1	,,	,,	,,	
11945	B. L.	635	,,	,,	,,	
11946	J. L.	1128	,,	,,	Complete.	
11947	,,	1129	,,	,,	,,	
11948	,,	1130	,,	,,	,,	
11949	,,	1131	,,	,,	,,	
11950	T. S.	253	,,	,,	' '	
11951	P. A.	142	,,	,,	,,	
11952	B. L.	2803	,,	,,	Fragment.	
11953	,,	2804	,,	,,	,,	
11954	,,	2577	,,	,,	Incomplete.	Jātakarma only.
11955	,,	2578	,,	,,	,,	,,
11956	,,	2580	,,	,,	,,	,,
11957	,,	2582	,,	,,	,,	,,
11958	,,	2584 a	,,	,,	,,	,,
11959	,,	2588	,,	,,	,,	,,
11960	,,	2559	,,	,,	,,	Puṇyāhavācana.
11961	,,	9127 a	Pl.	,,	,,	,,
11962	,,	3441	P.	,,	,,	Saptasaṃstha.
11963	,,	9480	Pl	Gr.	,,	,,
11964	,,	3440	P.	,,	,,	,,
11965	T. S.	806	,,	,,	,,	Mahanaminvratacatuṣṭayam.

PRAYOGARATNAM (Contd.)

Descriptive No.	Collection No.		Substance.	Script.	Remarks.
11966	B. L.	2588	P.	Gr.	Incomplete Nāmakaraṇa
11967	,,	2715	,,	,,	,, Smārtāgrayaṇa.
11968	S. K.	153	,	,,	,, Agnidvayasaṃsargavidhi.
11969	B. L.	408	,,	De.	Fragment.
11970	,,	2610	,,	,,	,, Vivāha.
11971	,,	2805	,,	,,	,,
11972	,,	2803	,,	,,	,,
11973	T. S.	196	,,	,,	,, Saptasaṃstha.
11974	,,	214	,,	,,	,,
11975	,,	419	,,	,,	,,

DETAILED REMARKS

on the MSS. IN THE ABOVE TABLE.

11973 At the end of colophon is seen:—

"सौम्यसंवत्सरे शुक्लपक्षम्यामाश्विने बुधे ।

अलिखत्सज्जनगरे कमलाकरसंज्ञिकः ॥

राक्षसभुवनस्थ पौराणिकोपनामकवासुदेवात्मजजीवरामसुतगोविन्द-

सुतस्य कमलाकरस्येदं पुस्तकम् ॥

परमशिवः शरणम् ॥ श्रीराम प्रसन्न ॥"

11974 At the end of colophon is seen:—

सुभानुसंवत्सरपुष्यपौर्णिमायां भृगोर्दिने ।

अलिखत्सज्जनगरे.... राक्षसरामसंज्ञिकः ॥

॥ प्रयोगरत्नमाला ॥

11976. PRAYOGARATNAMĀLĀ.

Burnell's Catalogue No. 654. Paper 13×16½ inches. Sheets—59. Lines—1? to a Page. Devanāgarī. No. of Granthas—8000 Incomplete. (Wants beginning and end).

Beginning:

.........योज्य सर्वकर्मसु ।

अरत्निमात्रं चतुरस्रपादौ कृत्वा....स्थण्डिलमाभमन्तात् ।

बहिः परिस्तीर्य दशाङ्गुलं च बर्हिस्ततश्चोत्तरतश्च तद्वत् ॥

End:

सर्वत्र कार्मकाले प्रधानमारोप्य तदग्निं विसृज्य अन्या-
ग्निमानीय उभौ समिदाधानमन्त्रेणाधाय विभज्य उभौ
अग्निद्वयमभ्यर्च्य, संस्कृताज्येन...

Colophon: (Sheet No. 4).

इति सर्वस्मृतिसंमिते स्थालीपाकविधिः समाप्तः ॥

(Sheet No. 42)

इति प्रयोगरत्नमालायां गार्ग्योक्तप्रतिकूलशान्तिविधिः संपूर्णः ॥

Subject: Prayogaratnamālā: A compendiun of Gṛhyaprayogas from several works.

Remarks:—The Ms. is in good condition.

॥ प्रयोगसारः ॥

11977. PRAYOGASĀRAḤ.

J. L. Collection No. 1132. Paper 9¾×8¾ inches. Sheets—24. Lines—10 to a Page. Devanāgarī. No. of Granthas—600. Nārāyaṇabhaṭṭa. Complete. Not printed.

Beginning:

अथौपासनाग्निमतं नैमित्तिकानि प्रायश्चित्तान्युच्यन्ते ।

य आहिताग्नेर्धर्मः स्यात्स औपासनिकस्य तु इति ।

End:

मार्जारन्यातिरिक्तश्वापदमुखावमर्शे परित्यागः मललेपनं

तु तैजसमृन्मयाश्ममयानां सर्वेषामपि भस्मना मृदा वा

संघृष्य जलैः प्रक्षालनाच्छुद्धिरिति ॥

Colophon

इति श्रीनारायणभट्टकृते प्रयोगसारे स्मार्ताग्निप्रायश्चित्तानि ।

Remarks.—The Ms. is in good condition.

॥ प्रयोगसारः—आपस्तम्बीयः ॥

11978. PRAYOGASĀRAḤ ĀPASTAMBĪYAḤ.

Burnell's Catalogue No. 3499. Paper. 12½ × 6¾ inches. Sheets—82. Lines—11 to a Page. Devanāgarī. No. of Granthas—2170. Gāgābhaṭṭa. Complete. Not printed.

Beginning.

उक्त्वाश्वलायनानां दिनकरसूनुः प्रणम्य रामाङ्घ्री ।

ब्रूतेऽथ तैत्तिरीयान्संस्कारानाशु संक्षिप्य ॥

अथ परिभाषा ।

श्रुतिस्मृतिविचोदितं करिष्यते यदा तदा ।

स्वकर्म यत्तदादितो...सुरा गुरुं वदेत् ॥

End:

भोजनप्रकारो भोजने वर्ज्यानि भोजने प्रायश्चित्तानि

च दिनकरोद्द्योतेऽनुसंधेयानि । *

इति वरुणमुपस्थाय प्रतीचे दिशे इत्यभिवादनम् ।

Colophon:

इति सायंसंध्याप्रयोगः । इति गागाभट्टकृतापस्तम्बप्रयोगसारः समाप्तः

Remarks:—The Ms. is in good condition. On the title page is given:

"आपस्तम्बप्रयोगसार केशवभट्टपुरोहितानामिदं पुस्तकम्"

This is the famous purohit of Śivāji who performed his coronation and wrote Pūrvamīmāṃsā works like Bhāṭṭacintāmaṇi a commentary on Jaiminisūtra (No. 6842). His father Dinakara also was a Mīmāṃsaka being the author of a commentary on Śāstradīpikā (No. 6924) This Gāgābhaṭṭa seems to have written a similar work for Āśvalāyanas from the introductory verse

---

॥ प्रत्याह्निकम् ॥

11979. PRATYĀHNIKAM.

Burnell's Catalogue No. 4291. Paper. 14½×7¼ inches. Sheets—1-13. Lines—12 to a Page. Devanāgarī. No. of Granthas—420. Raghunātha. Incomplete. Not printed.

Beginning:

... .पुण्यश्लोको युधिष्ठिरः ।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः ॥ ७ ॥
कार्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ॥ ८ ॥

End:

कृतोपवीती उपगम्य स्नानवर्जं कुर्यात् । ततः प्रबोधकालपर्यन्तं पुनः पूर्वशय्यायां सुखं स्वपेत् । इत्थं प्रभातोऽस्त्यादिश्रमनन्तं कार्यं प्रतिदिनं कुर्यात् ॥

Colophon:

इति रघुनाथेन विद्वद्दयभट्टमाधवसूनुना कृतानिबन्धा प्रत्याह्निक-

पद्धतिः ।

Remarks:—The Ms. is in an excellent condition and it has not been noticed by Burnell.

॥ विधानरत्नमाला ॥

11980. VIDHĀNARATNAMĀLĀ.

Burnell's Catalogue No. 179. Paper. $10\frac{1}{4} \times 4\frac{1}{2}$ inches. Sheets—248. Lines—9 to a Page. Devanāgarī. No. of Granthas—5200. Nṛsiṃhabhaṭṭa. Complete. Printed.

Remarks:—The Ms. is in good condition. The author calls himself the disciple of Viśvanātha son of Hari, the latter being very proficient in Vaidya This work is published in Ānandāśrama Sanskrit Series under the name Vidhānamālā.

VIDHĀNARATNAMĀLĀ.

Descriptive No.	Collection No.		Substance.	Script.	Remarks.
11981	B L.	180	P.	De.	Complete.
11982	,,	181	,,	,,	,,
11983	,,	9284	Pl.	Gr.	,,
11984	Not noticed by Burnell. Ms.	15725	P.	De.	,,

॥ शान्तिसारः ॥

11985. ŚĀNTISĀRAḤ.

Burnell's Catalogue No. 207. Paper. $12\frac{1}{4} \times 6$ inches.

Sheets—277. Lines—10 to a Page. Devanāgarī. No. of Granthas—6600. Dinakara. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥

श्रीरामकृष्णपितरं नत्वोमाम्बां सदाशिवं रामम् ।

दिनकरशर्मा तनुते स शान्तिसारं सुखाय विबुधानाम् ॥ १ ॥

ग्रन्थेऽस्मिञ्शान्तिसाराख्ये ये पदार्था निरूपिताः ।

तेषामादौ सुबोधाय क्रियतेऽनुक्रमः स्फुटः ॥ २ ॥

* *

ततश्च शिथिलीशान्तिर्महाशान्तिस्ततः परम् ।

राजाभिषेकश्च ततः प्रयोगः स्पष्ट ईरितः ॥

तत्र नवग्रहमखस्य धर्म...त्वेन सर्वशान्तिप्रकृतित्वात्

स आदौ निरूप्यते ॥

End:

इति महाशान्तिः । इयमेव देवीपुराणे त्रैलोक्याभ्युदयशा-

न्तिरित्युक्ता । अनुक्रमणिकायां महाशान्तित्वेनोपक्रमात् ।

श्रीरामेश्वरसूरिसूनुरुदभूद्यो भट्टनारायणः

क्षोणीपण्डितमानखण्डनजयः श्रीरामकृष्णस्ततः ।

मीमांसानयतत्त्ववित्दिनकरस्तस्योदभूत्तत्कृतिः

सेयं शान्तिक...त्नसारविषया रामाय दद्यान्मुदम् ॥

Colophon:

इति श्रीमद्विद्वन्मुकुटमाणिक्यमरीचिपिञ्जरितपदद्वन्द्वारविन्दश्रीमद्रामे-

श्वरसूरिसूनुश्रीमन्नारायणसुतश्रीमद्रामकृष्णात्मजदिनकरकृतः शा-

न्तिसारः समाप्तः ॥ श्रीमुद्गलेश्वरार्पणमस्तु ॥

Remarks:—The Ms. is in good condition.

SĀNTISĀRAH.

Descriptive No.	Collection No.		Substance.	Script.	Remarks.
11986	B. L.	268	P.	De.	Complete.
11987	,,	269	,,	,,	,,
11988	T. S.	509	,,	,,	,,

॥ शाकलकारिका ॥

11989. ŚĀKALAKĀRIKĀ.

T. S. Collection No. 222. Paper. 9×4 inches Sheets—56. Lines—10 to a page. Devanāgarī. No. of Granthas—1250. Śākala. Complete Not printed.

Beginning:

श्रीगुरुभ्यो नमः ॥

शाकलोऽहं प्रयोगं च वक्ष्ये बह्वृचकर्मणाम् ।
कारिकायामनुक्तं यत्तदेव हि समन्त्रकम् ॥
आचार्यस्य च वै यावत्सत्कर्मार्थप्रदर्शिनी ।
प्रोच्यते कारिकेतीह मद्भिश्चैत्र तु लौकिके ॥

End:

तारयेद्यः पितॄन्पापात्तथैव तराति स्वयम् ।
इत्येवं कथितो धर्मः शाकलेन महर्षिणा ॥

Colophon:

इति शाकलाचार्यकृतायां कारिकायामन्त्येष्टिविधिप्रकरणं समाप्तम् ।

सौम्यसंवत्सरे चैव श्रावणे शुक्लपक्षके ।

अम्यायने द्वितीयायां स्थिरवारे च कर्कटे ।
बह्वृचाचारविस्तारपूरिताः शाकलेरिताः ॥
त्रिंशताधिकसाहस्राः कारिकाः परमाद्भुताः ।
तासां च लेखनं जातं कृपया धूर्जटेरिदम् ॥
क्षमापनीयः प्रथमं लेखदोषो बुधैः सदा । श्रीकृष्ण ॥

Remarks:—The Ms. is in good condition.

॥ शान्तिकल्पः ॥

11990. ŚĀNTIKALPAḤ.

Burnell's Catalogue No. 488. Paper. $11\frac{1}{2} \times 5\frac{3}{4}$ inches. Sheets—110 Lines—10 to a Page. Devanāgarī. No. of Granthas—3000. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ।

रचनाप्रकारः । आसन्नमृत्युसमये । स्वगृहे गोमयानुलेपितरङ्गवल्ल्यादिरचितभूभागोपरि तरुणीं वत्ससहितां सुशीलां महिषीं स्नाप्य दक्षिणाभिमुखे निधाय * मृत्युमहिषीदानं करिष्ये ॥

End:

आचार्यप्रवरं प्रवृणीतार्थहताण्डिनैकार्षेयसार्ववाणिः समममंभातिमानवतामनुवदित्यश्वयुमानव्योहिप्रजा ॥ इति श्रीहि ब्राह्मणे ॥ ५......६ ॥ श्रीगङ्गाधराय नमः । स्वस्त्यस्तु । श्रीशारदाम्बायै नमः ॥

Colophon: (Sheet No. 108).

इति शान्तिकल्पं समाप्तम् ॥

इत्यातुरसंन्यासविधिः ॥

(Sheet No. 63).

इति शाकटायनोक्तयमळजननशान्तिः ॥

Remarks:—The Ms. is in very good condition.

॥ शान्तिकल्पलता ॥

11991. ŚĀNTIKALPALATĀ.

Burnell's Catalogue No. 288. Paper. 12×6½ inches. Sheets—95 and Index 2. Lines—11 to a Page. Devanāgarī. No. of Granthas—2200. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥ रचनाप्रकारः ॥

आसन्नमृत्युसमये स्वगृहे गोमयानु॰

End:

अतिमानवलामनुवदत्य॰वर्युमानं॰बोहि प्रज्ञा इति हि ब्राह्मणे ॥

Colophon:

इति शान्तिकल्पं समाप्तम् ॥

श्रीगङ्गाधराय नमः ॥ स्वस्त्यस्तु श्रीशारदाम्बायै नमः ॥

Remarks:—The Ms. is in good condition.

ŚĀNTIKALPALATĀ.

Descriptive No.	Collection No.		Substance.	Script.	Remarks.
11992	B. L.	289	P.	De.	Complete.
11993	,,	290	,,	,,	,,
11994	,,	291	,,	,,	,,

॥ शान्तिरत्नाकरः ॥

11995. ŚĀNTIRATNĀKARAḤ

Burnell's Catalogue No. 287. Paper. 10 × 5¼ inches. Sheets —229 and Index 1. Lines—11 to a Page. Devanāgarī. No of Granthas—6000. Kamalākara. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥ श्रीदेव्यै नमः । श्रीरामवरद श्री·
शिव पाहि ॥

नारायणात्मजं श्रीमद्रामकृष्णस्य सूनुना ।
कमलाकरसंज्ञेन प्रोच्यन्ते शान्तयः क्रमात् ॥

तत्र, एवं विनायकं पूज्यं ग्रहांश्चैव विधानतः ।
कर्मणां फलमाप्नोति श्रियं चाप्नोत्यनुत्तमाम् ॥ इति ॥
याज्ञवल्क्येन सर्वकर्मार्हत्वोक्तेर्विनायकशान्तिरुच्यते ।

End:

विशेषस्तु मत्कृते निर्णयसिन्धौ नवरात्रवर्णने ज्ञेयः ।
इति शतचण्डीसहस्रच......प्रयोगः ।

यो भाट्टतन्त्रगहनार्णवकर्णधारः
शास्त्रान्तरेषु निखिलेषु पि...... ।
....ण
प्रीतोऽमुनास्तु स कृती बुधरामकृष्णः ॥

Colophon:

इति श्रीमत्पदवाक्यप्रमाणप........सुतमीमांसकरामकृष्णभट्टात्मजक-
मलाकरभट्टकृतं शान्तिरत्नं समाप्तम् ॥ श्रीरस्तु ॥

Remarks:—The Ms. is in a good condition.

॥ श्राद्धकल्पलता ॥

11996. ŚRĀDDHAKALPALATĀ.

Burnell's Catalogue No. 105. Paper. 11×5 inches. Sheets —171 Lines—10 to a Page. Devanāgarī. No of Granthas—4300. Paṇḍita Vināyaka. Complete Not printed.

Beginning:

समालम्बे लम्बोदरचरणपङ्केरुहयुगं
यदालम्ब्य स्वैरं विजहति च विघ्नान्धतमसम् ।
स्मरन्तः सन्तो यं निरुपधिपरानन्दलहरी-
समाक्रान्तस्वान्ता हरिहरविरिञ्चिप्रभृतयः ॥
अपूर्वं तद्वन्दे कमपि रमणीयाकृतिमहो
महिम्नां सर्वस्वं तरणितनयातीरनिलयम् ॥

* *

अस्ति प्रशस्तैर्विभवैः समस्तै-
समस्तभूमण्डलमण्डनं यत् ।
साधारणं नाम पुरं पुरारे-
र्मुदे मुरारेरपि यद्द्विरोऽपि ॥
समजनि जनतायाः प्राणसाधारणेऽस्मि-
न्सहामिल इति नाम्ना कोऽपि वंशः प्रसिद्धः ।
यमधिजनिमिवैकं देवदेवोऽपि विष्णु-
र्विबुधकुलसमेतोऽथापि वाञ्छत्यवाप्तुम् ॥
अखण्डभूमण्डलमण्डनेऽस्मि-
न्प्रतापसंतापितसप्तसप्तिः ।
दयामयान्तःकरणो बभूव
स सिंहमल्लः प्रथितः पृथिव्याम् ॥

प्रतापपरितापितप्रबलभूमिपालावली-
शिरोमणिमरीचिभिः प्रविलसत्पदाम्भोरुहः ।
समस्तसुरसुन्दरीसततगीतकीर्त्तिस्ततो
वसावनमहीपतिः समजनि क्षमामण्डले ॥

यत्तेजःपुञ्जतत्या दिनकररुचयः शेरते शर्वरीषु
प्रायः पाथोधिमध्ये रजनिकरकलालाञ्छनं बिभ्रतीमाः ।
कीर्त्या यस्याभिभूतास्त्रिजगन्ति गतया भूतलं भासयन्तो
भूस्तस्मादस्तशत्रुः सह गिलतिलको रूपचन्द्रः क्षितीन्द्रः ॥

निजकुलजनताचकोरचन्द्रो
बुधजनकैरवहृत्प्रबोधचन्द्रः ।
कविकुलकविताःसुधाब्धिचन्द्रो
जगति बभूव नृपस्तु रूपचन्द्रः ॥

जातः क्षत्रियवंशकैरव........सुधांशुस्ततो
दाने देवतरोरपि प्रतिदिनं संपादिता न्यूनता ।
शौर्ये पाण्डवकर्णमुख्य....मादिना हीनता
येनासाविह धैर्यधाम परमानन्दो महेन्द्रः क्षितौ ॥

लक्ष्मीर्यत्करुणाकटाक्षनिवहे पाणौ सुपर्वद्रुमो
वक्त्रे शीतकरः स्मिते नवसुधा क्रोधे च हालाहलम् ।
दृष्टान्तः प्रथमस्य विक्रमनिधिर्गाम्भीर्यपर्मादय-
स्तद्विषः करुणामयेन विहितः पूर्णो हि रत्नाकरः ॥

श्रीरामपण्डितसुतः पण्डितः श्रीविनायकः ।
आदिष्टस्तेन तनुते श्राद्धकल्पलतामिमाम् ॥

गोविन्दपण्डितकृतामवलम्ब्यातियत्नतः ।
श्राद्धकल्पलतामेनां कुर्वे तां श्राद्धदीपिकाम् ॥
श्राद्धकल्पलता मेयं परमानन्दकारिता ।
विदुषामर्थसन्देहे विदधातु चमत्क्रियाम् ॥

End:

दशकृत्वोऽपि चेदापो गायत्र्या श्राद्धभुग्द्विजः ।
ततः संध्यामुपासीत शुध्येत्तु तदनन्तरम् ॥
अस्ति क्षत्रियवंशभूषणमणिर्भूमीशचूडामणिः
शत्रूणां द्युमणिः प्रतापनविधौ धर्माराणिः कर्मसु ।
कीर्त्तीनां सरणि....भा...तरणिः प्रत्यर्थिपृथ्वीभृतां
संसारार्णवतारणैकतरणिः संकल्पचिन्तामणिः ॥
स जयति परमानन्दः कीर्त्या यस्यामृतेन पूर्णाशाः ।
त्रिदशाः सुरारि....सुधाकृते नैव तन्वते वैरम् ॥
धर्माधिकादिकुलकैरवचन्द्रकान्त
श्रीरामपण्डितसुतेन विनायकेन ।
आदेशतोऽस्य विहितासु मनोऽभिरामा
श्रीश्राद्धकल्पलतिका नितरां प्ररुह्यात् ॥ ३ ॥
अङ्कुरिता मुनिवाक्यैर्व्याख्यातॄणां द्विपत्रिता सूक्तैः ।
पल्लविता कृतिनेदं कल्पलता वाञ्छितं दिशतु ॥

* * *

परमानन्ददानाम्बुनिषेकेणानुवासरम् ।
श्राद्धकल्पलता रूढा देयादार्थिकुलेप्सितम् ॥

Colophon:

इति श्रीमहाराजाधिराजमहगिलान्वयैकभूषणपरमानन्दादिष्टधर्माधि-

कारिरामपण्डितविनायककृतायां श्राद्धकल्पलतायां नवश्राद्धनिरूप-
णस्तबकः पञ्चमः समाप्तः ॥

श्रीगणेशार्पणमस्तु ॥ श्रीकृष्णार्पणमस्तु ॥
विद्वत्प्रभुवर + एव प्रवर्धताम् ।

Remarks:—The Ms. is in good condition. This is a work exclusively dealing with various kinds of Śrāddha, the time, and the method of performing them. The author mentions himself as the son of a Śrīrāmapaṇḍita of Dharmādhikārikartā. He says that he wrote this at the bidding of a king Paramānanda of Sahagala family following the path of previous writers like Govindapaṇḍita. The geneology of his patron is given as follows.

Simhamalla
|
Vasâvana
|
Rūpacandra
|
Paramānanda.

The author is evidently a North Indian and from one of the introductory verses it may be gleaned that he belonged to a town called Hariharapura.

ŚRĀDDHAKALPALATĀ.

Descriptive No	Collection No.	Substance.	Script.	Remarks.
11997	B L. 106	P.	De.	Complete.
11998	Not noticed by Burnell. Ms 15726.	Pl.	Te.	Incomplete.

॥ श्राद्धनिर्णयदीपिका ॥

11999. ŚRĀDDHANIRṆAYADĪPIKĀ.

T. S. Collection No. 321. Paper. 11×8½ inches Sheets—17 (21-85 & the last one Additional No. 37). Lines—7

to a Page. Devanāgarī. No. of Granthas—238. Complete. Not printed.

Beginning:

श्रीगणेशाय नमः ॥

प्रणम्य दक्षिणामूर्तिं माधवार्दींश्च सद्गुरून् ।
विरच्यते सतां प्रीत्यै श्राद्धनिर्णयदीपिका ॥

Colophon:

...विद्यासंप्रदायस्य पराशरकुलकासारकैरवाङ्कुरस्य तिर्मलकरवेर्यक जीविकासंदेहतिमिरमणिदीपिका श्राद्धनिर्णयदीपिका संपूर्णा ।

लिखिता स्वेन रचिता श्राद्धनिर्णयदीपिका ।
अनुगृह्णन्तु मां सर्वे धर्मशास्त्रविशारदाः ॥

साम्बशिवार्पणमस्तु ॥

इति श्राद्धनिर्णयदीपिका संपूर्णा ॥

Remarks:—The Ms. is in good condition, The author himself is the scribe of this work He says that he belongs to Parāśarakula and mentions a Guru by name Mādhava.

॥ श्राद्धपद्धतिः ॥

12000. ŚRĀDDHAPADDHATIḤ.

T. S. Collection No. 233 Paper 10×4 inches. Sheets—60. Lines—7 to a Page. Devanāgarī. No. of Granthas—1000. Raghunātha Complete Not Printed.

Beginning:

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥
श्रीभगवत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥

भट्टनारायणं नत्वा पितरौ ढुण्ढिराघवौ ।
